श्रीः

श्री लक्ष्मीनृसिंह परब्रह्मणे नमः

श्री पद्मावती समेत श्रीवेङ्कटेशाय नमः



# श्रीवेङ्कटेशाष्टोत्तरशतनामावळिः

पूर्वानुवाकः

श्रियःकान्ताय कल्याण निधये नेथयेऽर्थिनाम्।

श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गळम्॥

श्री वेङ्कटाचलाधीशं श्रियाऽध्यासित वक्षसम्।

श्रितचेतनमन्दारं श्रीनिवासमहं भजे॥

मुनयः --

सूत सर्वार्थ तत्वज्ञ सर्ववेदान्तपारग।

येन चाराधितस्सद्यः श्रीमद्वेङ्कटनायकः॥

भवत्यभीष्टसर्वार्थप्रदस्तत् ब्रूहिनो मुने।

इति पृष्टस्तदा सूतो ध्यात्वास्वात्मनि तत् क्षणात्॥

श्रीसूतः --

उवाच मुनिशार्दूलान् श्रूयतामिति वै मुनिः ।

अस्ति किञ्चिन्महद्गोप्यं भगवत्प्रीति कारकम् ॥

पुरा शेषेण कथितं कपिलाय महात्मने ।

नाम्नामष्ट शतं पुण्यं पवित्रं पापनाशनम् ॥

आदाय हेमपद्मानि स्वर्णदी सम्भवानि च ।

ब्रह्मा तु पूर्वमभ्यर्च्य श्रीमद्वेङ्कटनायकम् ॥

अष्टोत्तर शतैर्दिव्यैर्नामभिर्मुनि पूजितैः ।

स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकपितामहः ॥

भवद्भिरपि पद्मैश्च समर्च्यस्तैश्च नामभिः ।

तेषां शेषनगाधीश मान सोल्लास कारिणाम् ॥

नाम्नाष्ट शतं वक्ष्ये वेङ्कटाद्रि निवासिनः ।

आयुरारोग्यदं पुंसां धनधान्य सुख प्रदम् ॥

ज्ञान प्रदं विशेषेण महदैश्वर्य कारकम् ।

अर्चयेन्नामभिर्दिव्यैर्वेङ्कटेश पदाङ्कितैः ॥

नाम्नामष्टशतस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः ।

छन्दोऽनुष्टुप्तथा देवो वेङ्कटेश उदाहृतः ॥

नीलगोक्षीरसम्भूतो बीजमित्युच्यते बुधैः ।

श्रीनिवासस्तथाशक्तिर्हृदयं वेङ्कटाधिपः ॥

विनियोगस्तथाऽभीष्टसिद्ध्यर्थे च निगद्यते ।

ओं नमो वेङ्कटेशाय शेषाद्रिनिलयाय च ॥

नामावळिः

| |
|---|
| ओं वेङ्कटेशाय श्रीवेङ्कटेशाय नमः |
| ओं शेषाद्रि निलयाय श्रीवेङ्कटेशायनमः |
| ओं वृषद्दग्गोचराय श्रीवेङ्कटेशायनमः |
| ओं विष्णवे श्रीवेङ्कटेशायनमः |
| ओं सदञ्जन गिरीशाय श्रीवेङ्कटेशायनमः |
| ओं वृषाद्रि पतये श्रीवेङ्कटेशायनमः |
| ओं मेरुपुत्र गिरीशाय श्रीवेङ्कटेशायनमः |
| ओं सरस्स्वामि तटीजुषे श्रीवेङ्कटेशायनमः |
| ओं कुमाराकल्प सेव्याय श्रीवेङ्कटेशायनमः |
| ओं वज्रिदृग्विषयाय श्रीवेङ्कटेशायनमः 010 |
| ओं सुवर्चला सुतन्यस्त सैनापत्य भराय श्रीवेङ्कटेशायनमः |
| ओं रामाय श्रीवेङ्कटेशायनमः |
| ओं पद्मनाभाय श्रीवेङ्कटेशायनमः |
| ओं सदा वायुस्तुताय श्रीवेङ्कटेशायनमः |
| ओं त्यक्त वैकुण्ठलोकाय श्रीवेङ्कटेशायनमः |
| ओं गिरिकुञ्ज विहारिणे श्रीवेङ्कटेशायनमः |
| ओं हरिचन्दन गोत्रेन्द्र स्वामिने श्रीवेङ्कटेशायनमः |
| ओं शङ्खराजन्य नेत्राब्ज विषयाय श्रीवेङ्कटेशायनमः |
| ओं वसूपरिचर त्रात्रे श्रीवेङ्कटेशायनमः |
| ओं कृष्णाय श्रीवेङ्कटेशायनमः 020 |

ओं अब्धिकन्या परिष्वक्त वक्षसे श्रीवेङ्कटेशायनमः

ओं वेङ्कटाय श्रीवेङ्कटेशायनमः

ओं सनकादि महायोगि पूजिताय श्रीवेङ्कटेशायनमः

ओं देवजित्प्रमुखानन्द दैत्य संघ प्रणाशिने श्रीवेङ्कटेशायनमः

ओं श्वेत द्वीप वसन्मुक्त पूजितांघ्रि युगाय श्रीवेङ्कटेशायनमः

ओं शेष पर्वतरूपत्व प्रकाशनपराय श्रीवेङ्कटेशायनमः

ओं सानुस्थापित तार्क्ष्याय श्रीवेङ्कटेशायनमः

ओं तार्क्ष्याचल निवासिने श्रीवेङ्कटेशायनमः

ओं मायागूढविमानाय श्रीवेङ्कटेशायनमः

ओं गरुडस्कन्धवासिने श्रीवेङ्कटेशायनमः 030

ओं अनन्तशिरसे श्रीवेङ्कटेशायनमः

ओं अनन्ताक्षाय श्रीवेङ्कटेशायनमः

ओं अनन्तचरणाय श्रीवेङ्कटेशायनमः

ओं श्रीशैलनिलयाय श्रीवेङ्कटेशायनमः

ओं दामोदराय श्रीवेङ्कटेशायनमः

ओं नीलमेघनिभाय श्रीवेङ्कटेशायनमः

ओं ब्रह्मादि देव दुर्दर्श विश्वरूपाय श्रीवेङ्कटेशायनमः

ओं वैकुण्ठागत सद्धेम विमनान्तर्गताय श्रीवेङ्कटेशायनमः

ओं अगस्त्याभ्यर्थिता शेष जनदृग्गोचराय श्रीवेङ्कटेशायनमः

ओं वासुदेवाय श्रीवेङ्कटेशायनमः 040

ओं हरये श्रीवेङ्कटेशायनमः

ओं तीर्थपञ्चक वासिने श्रीवेङ्कटेशायनमः

ओं वामदेवप्रियाय श्रीवेङ्कटेशायनमः

ओं जनकेष्टप्रदाय श्रीवेङ्कटेशायनमः

ओं मार्कण्डेय महातीर्थ जातपुण्य प्रदाय श्रीवेङ्कटेशायनमः

ओं वाक्पति ब्रह्मदात्रे श्रीवेङ्कटेशायनमः

ओं चन्द्रलावण्यदायिने श्रीवेङ्कटेशायनमः

ओं नारायण नगेशाय श्रीवेङ्कटेशायनमः

ओं ब्रह्म क्लृप्तोत्सवाय श्रीवेङ्कटेशायनमः

ओं शङ्ख चक्र वरानम्र लसत्कर तलाय श्रीवेङ्कटेशायनमः 050

ओं द्रवन्मृग मदासक्त विग्रहाय श्रीवेङ्कटेशायनमः

ओं केशवाय श्रीवेङ्कटेशायनमः

ओं नित्ययौवन मूर्तये श्रीवेङ्कटेशायनमः

ओं अर्थितार्थ प्रदात्रे श्रीवेङ्कटेशायनमः

ओं विश्वतीर्थाघहारिणे श्रीवेङ्कटेशायनमः

ओं तीर्थस्वामि सरस्स्नात जनाभीष्ट प्रदायिने श्रीवेङ्कटेशायनमः

ओं कुमारधारिका वासस्कन्धाभीष्ट प्रदाय श्रीवेङ्कटेशायनमः

ओं जानुदघ्न समुद्भूत पोत्रिणे श्रीवेङ्कटेशायनमः

ओं कूर्ममूर्तये श्रीवेङ्कटेशायनमः

ओं किन्नरद्वन्द्व शापान्त प्रदात्रे श्रीवेङ्कटेशायनमः 060

ओं विभवे श्रीवेङ्कटेशायनमः

ओं वैखानस मुनेश्रेष्ठ पूजिताय श्रीवेङ्कटेशायनमः

ओं सिंहाचल निवासाय श्रीवेङ्कटेशायनमः

ओं श्रीमन्नारायणाय श्रीवेङ्कटेशायनमः

ओं सद्भक्त नीलकण्ठार्च नृसिंहाय श्रीवेङ्कटेशायनमः

ओं कुमुदाक्ष गणश्रेष्ठ सैनापत्य प्रदाय श्रीवेङ्कटेशायनमः

ओं दुर्मेधः प्राणहर्त्रे श्रीवेङ्कटेशायनमः

ओं श्रीधराय श्रीवेङ्कटेशायनमः

ओं क्षत्रियान्तक रामाय श्रीवेङ्कटेशायनमः

ओं मत्स्य रूपाय श्रीवेङ्कटेशायनमः 070

ओं पाण्डवारि प्रहर्त्रे श्रीवेङ्कटेशायनमः

ओं श्रीकराय श्रीवेङ्कटेशायनमः

ओं उपत्यका प्रदेशस्थ शङ्कर ध्यातमूर्तये श्रीवेङ्कटेशायनमः

ओं रुक्माब्ज सरसीकूल लक्ष्मीकृत तपस्विने श्रीवेङ्कटेशायनमः

ओं लसल्लक्ष्मी करांभोज दत्त कल्हारक स्त्रजे श्रीवेङ्कटेशायनमः

ओं सालग्राम निवासाय श्रीवेङ्कटेशायनमः

ओं शुक दृग्गोचराय श्रीवेङ्कटेशायनमः

ओं नारायणार्थिताशेष जनदृग्विषयाय श्रीवेङ्कटेशायनमः

ओं मृगयारसिकाय श्रीवेङ्कटेशायनमः

ओं वृषभासुर हारिणे श्रीवेङ्कटेशायनमः 080

ओं अञ्जनागोत्र पतये श्रीवेङ्कटेशायनमः

ओं वृषभाचल वासिने श्रीवेङ्कटेशायनमः

ओं अञ्जनासुत दात्रे श्रीवेङ्कटेशायनमः

ओं माधवीयाघ हारिणे श्रीवेङ्कटेशायनमः

ओं प्रियङ्गु प्रियभक्षाय श्रीवेङ्कटेशायनमः

ओं श्वेतकोलवराय श्रीवेङ्कटेशायनमः

ओं नीलधेनु पयोधारा सेक देहोद्भवाय श्रीवेङ्कटेशायनमः

ओं शङ्कर प्रियमित्राय श्रीवेङ्कटेशायनमः

ओं चोळपुत्र प्रियाय श्रीवेङ्कटेशायनमः

ओं सुधर्मिणी सुचैतन्य प्रदात्रे श्रीवेङ्कटेशायनमः 090

ओं मधुघातिने श्रीवेङ्कटेशायनमः

ओं कृष्णाख्य विप्र वेदान्त देशिकत्व प्रदाय श्रीवेङ्कटेशायनमः

ओं वराहाचल नाथाय श्रीवेङ्कटेशायनमः

ओं बलभद्राय श्रीवेङ्कटेशायनमः

ओं त्रिविक्रमाय श्रीवेङ्कटेशायनमः

ओं महते श्रीवेङ्कटेशायनमः

ओं हृषीकेशाय श्रीवेङ्कटेशायनमः

ओं अच्युताय श्रीवेङ्कटेशायनमः

ओं नीलाद्रिनिलयाय श्रीवेङ्कटेशायनमः

ओं क्षीराब्धि नाथाय श्रीवेङ्कटेशायनमः 100

| |
|---|
| ओं वैकुण्ठाचल वासिने श्रीवेङ्कटेशायनमः |
| ओं मुकुन्दाय श्रीवेङ्कटेशायनमः |
| ओं अनन्ताय श्रीवेङ्कटेशायनमः |
| ओं विरिञ्चाभ्यर्थितानीत सौम्यरूपाय श्रीवेङ्कटेशायनमः |
| ओं सुवर्णमुखरी स्नात मनुजाभीष्ट दायिने श्रीवेङ्कटेशायनमः |
| ओं हलायुध जगत्तीर्थ समस्त फलदयिने श्रीवेङ्कटेशायनमः |
| ओं गोविन्दाय श्रीवेङ्कटेशायनमः |
| ओं श्रीनिवासाय श्रीवेङ्कटेशायनमः 108 |

## फलश्रुतिः

अष्टोत्तर शतं नाम्नां चतुर्थ्या नमसाऽन्वितम् ॥

यःपठेच्छृणुयान्नित्यं श्रद्धा भक्ति समन्वितः ।

तस्य श्रीवेङ्कटेशस्तु प्रसन्नो भवति ध्रुवम् ॥

अर्चनायां विशेषेण ग्राह्यमष्टोत्तरं शतम्

वेङ्कटेशाभिधेयैर्यो वेङ्कटाद्रि निवासिनम् ॥

अर्चयेन्नामभिस्तस्य फलं मुक्तिर्न संशयः ।

गोपनीयमिदं स्तोत्रं सर्वेषां न प्रकाशयेत् ॥

श्रद्धा भक्ति युजामेव दापयेन्नाम सङ्ग्रहम् ।

इति शेषेण कथितं कपिलाय महात्मने ॥

कपिलाख्य महायोगि सकाशात्तु मया श्रुतम् ।

तदुक्तं भवतामद्य सद्यः प्रीतिकरं हरेः ॥

## इति श्री वेङ्कटेशाष्टोत्तरशतनामावळिस्संपूर्णा

| HOME | STOTRA LIST |
|---|---|